प्रसिद्धा । परिकर्त्ती गुदे परिकर्त्तनवत् पीड़ा इति नारायणचूर्णम् ॥ * ॥

"स्नुक्क्षीरदन्तीत्रिफलाविडङ्ग-
सिंहीत्रिवृच्चित्रकसूर्य्यकल्कैः ।
घृतं विपक्वं कुड़वप्रमाणं
तोयेन तस्याक्षसमेन कर्षम् ॥
पीतोष्णमम्भोऽनुपिबेद्विरिक्ते
पेयं रसं वा प्रपिबेद्विधिज्ञः ।
नाराचमेनं जठरामयाना-
मुक्तं प्रयुक्तं प्रवदन्ति सन्तः" ॥

इति नाराचघृतम् ॥ * ॥

"वचाखण्डाः कर्षमात्रायाः कल्कं दध्यादिवेष्टितम् ।
निगिलेद्दारिणा नित्यमुदरव्याधिशान्तये" ॥

वचाखण्डी स्तूरणपत्नी माणभेदः । वचाखण्डी इति लोके ॥ * ॥

"पुनर्नवादारुनिशासविश्वा-
पटोलपथ्याः पिचुमर्द्ददारु ।
सनागरच्छिन्नरुहेति सर्व्वैः
कृतः कषायो विधिना विधिज्ञैः ॥
गोमूत्रयुक् गुग्गुलुना च युक्तः
पीतः प्रभाते नियतं नराणाम् ।
सर्व्वाङ्गशोथोदरपार्श्वशूल-
श्वासान्वितं पाण्डुगदं निहन्ति" ॥

पुनर्नवादिक्वाथः । इत्युदराधिकारः । इति भावप्रकाशः ॥ ("उदरं स्तिमितं गुरु" इति वैद्यकमाधवकरधृतरुग्विनिश्चयग्रन्थः । अस्य शब्दस्य रोगविशेषवाच्यत्वेऽन्याविशेषवाच्यविवृत्तिरुदररोगशब्दे ज्ञातव्या ।)

उदरग्रन्थिः, पुं, (उदरस्य ग्रन्थिरिव ।) गुल्मरोगः । इति हेमचन्द्रः ॥

उदरत्राणं, क्ली, (उदरस्य त्राणं यस्मात् ।) उदरबन्धवस्त्रादि । तत्पर्य्यायः । नागोदं २ । इति हेमचन्द्रः ॥

उदरथिः, पुं, (उद्गच्छति उदर्य्यते वा । उत् + ऋ + उदर्त्तेश्चिदिति गथिन् ।) समुद्रः । सूर्य्यः । इति हेमचन्द्रः ॥

उदरपिशाचः, त्रि, (उदराय तत्पूरणाय पिशाच इव ।) सर्व्वान्नखादकः । तत्पर्य्यायः । सर्व्वान्नीनः २ सर्व्वान्नभक्षकः ३ । इति हेमचन्द्रः ॥

उदरम्भरिः, त्रि, (उदरं बिभर्त्तीति । उदर + भृ + इन् + मुम् च । निपातसिद्धः ।) स्वोदरमात्रपूरकः । तत्पर्य्यायः । कुक्षिम्भरिः २ आत्मम्भरिः ३ । इति हेमचन्द्रः ॥

उदरव्याधिः, पुं, (उदरस्य व्याधिः ।) उदररोगविशेषः । यथा,—गारुड़े १६४ अध्यायः ॥

"कदलीयवक्षारन्तु पानीयेन प्रसाधितम् ।
तदास्वादन्नाशयन्ति उदरव्याधयोऽखिलाः" ॥

उदररोगः, पुं, (उदरस्य रोगः ।) जठरव्याधिविशेषः । उदरी इति भाषा ॥

("सिद्धविद्याधराकीर्णे कैलासे नन्दनोपमे ।
तप्यमानं तपस्तीव्रं साक्षाद्धर्म्ममिव स्थितम् ॥
आयुर्व्वेदविदां श्रेष्ठं भिषग्विद्याप्रवर्त्तकम् ।
पुनर्व्वसुं जितात्मानमग्निवेशोऽब्रवीद्वचः ॥
भगवन्नुदरैर्दुःखैर्दृश्यन्ते ह्यर्द्दिता नराः ।
शुष्कवक्त्राः कृशैर्गात्रैराध्मातोदरकुक्षयः ॥
प्रणष्टाग्निबलाहाराः सर्व्वचेष्टास्वनीश्वराः ।
दीनाः प्रतिक्रियाभावाज्जहतोऽसूननाथवत् ॥
तेषामायतनं सङ्ख्यां प्राग्रूपाकृतिभेषजान् ।
यथावच्छ्रोतुमिच्छामि गुरुणा सम्यगीरितम् ॥
सर्व्वभूतहितार्थिः शिष्येणैवं प्रचोदितः ।
सर्व्वभूतहितं वाक्यं व्याहर्त्तुमुपचक्रमे" ॥

अस्य सनिदानं सम्प्राप्तिकलक्षणं यथा,—

"अग्निदोषान्मनुष्याणां रोगसङ्घाः पृथग्विधाः ।
मलवृद्ध्या प्रवर्त्तन्ते विशेषेणोदराणि तु ॥
मन्देऽग्नौ मलिनैर्भुक्तैरपाकाद्दोषसञ्चयः ।
प्राणाग्न्यपानान् सन्दूष्य मार्गान् बद्ध्वोत्तरोत्तरान् ॥
त्वङ्मांसान्तरमागम्य कुक्षिमाध्मापयन् भृशम् ।
जनयत्युदरं तस्य हेतुं शृणु सलक्षणम्" ॥

सामान्यहेतवो यथा,—

"अत्युष्णलवणक्षारविदाह्यम्लरसाशनात् ।
मिथ्यासंसर्ज्जनाद्रूक्षविरुद्धाशुचिभोजनात् ॥
प्लीहार्शोग्रहणीदोषकर्षणात् कर्म्मविभ्रमात् ।
क्लिष्टानामप्रतीकाराद्रौक्ष्याद्वेगविधारणात् ॥
स्रोतसां दूषणादामात् सङ्क्षोभादतिपूरणात् ।
अर्शोवातशकृद्रोधादन्त्रस्फुटनभेदनात् ॥
अतिसञ्चितदोषाणां पापं कर्म्म च कुर्व्वताम् ।
उदराण्युपजायन्ते मन्दाग्नीनां विशेषतः" ॥

प्राग्रूपं यथा,—

"क्षुन्नाशः स्वादतिस्निग्धगुर्व्वन्नं पच्यते चिरात् ।
भुक्तं विदाह्यते सर्व्वं जीर्णाजीर्णं न वेत्ति च ॥
सहते नातिसौहित्यमीषच्छोथश्च पादयोः ।
शश्वद्बलक्षयोऽल्पेऽपि व्यायामे श्वासमृच्छति ॥
पुरीषनिचयो रूक्षिरुदावर्त्तकृता च रुक् ।
वस्तिसन्धौ रुगाध्मानं वर्द्धते पाट्यतेऽपि च ॥
आतन्यते च जठरमपि लघ्वल्पभोजनात् ।
राजीजन्म वलीनाशः इति लिङ्गं भविष्यताम्" ॥

सम्प्राप्तिर्यथा,—

"रुद्ध्वा स्वेदाम्बुवाहानि दोषाः स्रोतांसि सञ्चिताः ।
प्राणाग्न्यपानान् हि सन्दूष्य जनयन्त्युदरं नृणाम्" ॥

सामान्यलक्षणं यथा,—

"कुक्षेराध्मानमाटोपः शोफः पादकरस्य च ।
मन्दोऽग्निः श्लक्ष्णगण्डत्वं कार्श्यञ्चोदरलक्षणम्" ॥

वातजस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—

"रूक्षाल्पभोजनायासवेगोदावर्त्तकर्षणैः ।
वायुः प्रकुपितः कुक्षिहृद्वस्तिगुदमार्गगः ॥
हत्वाग्निं कफमुद्धूय तेन रुद्धगतिस्तया ।
आचिनोत्युदरं जन्तोस्त्वङ्मांसान्तरमाश्रितः" ॥

अस्य रूपाणि ।

"कुक्षि-पाणि-पाद-वृषण-श्वयथूदर-विपाटनम् अनियतौ च वृद्धिह्रासौ कुक्षि-पार्श्वशूलोदावर्त्ताङ्गमर्द्द-पर्व्वभेद-शुष्ककास-कार्श्य-दौर्ब्बल्यारोचक-विपाका अधोगुरुत्वं वातवर्च्चोमूत्रसङ्गः श्यावारुणत्वं नखनयनवदनत्वङ्मूत्रवर्च्चसामपि चोदरं तनुसितराजीशिरासन्ततमाहतमाध्मातदृतिशब्दवच्च-वति । वायुश्चोर्द्धमधस्तिर्य्यक् च सशूलशब्दश्चरत्येतद्वातोदरं विद्यात्" ॥

पित्तजस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—

"कट्वम्ललवणात्युष्णतीक्ष्णाग्न्यातपसेवनैः ।
विदाह्यध्यशनाजीर्णैश्चाशु पित्तं समाचितम् ॥
प्राप्यानिलकफौ रुद्ध्वा मार्गमुन्मार्गमास्थितम् ।
निहन्त्यामाशये वह्निं जनयत्युदरं ततः" ॥

अस्य रूपाणि ।

"दाहज्वर-तृष्णा-मूर्च्छातिसार-भ्रमाः कटुकास्यत्वं हरितहारिद्रत्वं नख-नयन-वदन-त्वङ्-मूत्र-वर्च्चसामपि चोदरं नील-पीत-हारिद्र-हरित-ताम्रराजीशिरावनद्धं दह्यत् दूयते धूप्यते ऊष्मायते स्विद्यते क्लिद्यते मृदुस्पर्शं क्षिप्रपाकञ्च भवत्येतत् पित्तोदरं विद्यात्" ॥

श्लेष्मजनितस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—

"अव्यायामदिवास्वप्नस्वाद्वतिस्निग्धपिच्छिलैः ।
दधिदुग्धोदकानूपमांसैश्चाप्यपसेवितैः ॥
क्रुद्धेन श्लेष्मणा स्रोतः स्वाहतेष्वावृतोऽनिलः ।
तमेव पीड़यन् कुर्य्यादुदरं बहिरन्तगः" ॥

अस्य रूपाणि ।

"गौरवारोचकाविपाकाङ्गमर्द्द-सुप्ति-पाणि-पाद-मुष्कोरुशोफोत्क्लेश-निद्रा-श्वास-कासाः शुक्लत्वञ्च नख-नयन-वदन-त्वङ्मूत्रवर्च्चसामपि चोदरं शुक्लराजीशिरासन्ततं गुरुस्तिमितस्थिरं कठिनञ्च भवत्येतत् श्लेष्मोदरं विद्यात्" ॥

त्रिदोषजस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,

"दुर्व्वलाग्नेरपथ्यामविरोधिगुरुभोजनात् ।
स्त्रीदत्तैश्च रजोरोम-विण्मूत्रास्थिनखादिभिः ॥
विषैश्च मन्दैर्व्वातायाः कुपिताः सञ्चितास्त्रयः ।
शनैः कोष्ठे प्रकुर्व्वन्तो जनयन्त्युदरं नृणाम्" ॥

अस्य रूपाणि ।

"सर्व्वेषामेव दोषाणां समस्तानि लिङ्गान्युपलभ्यन्ते वर्णाश्च नखादिषूदरमपि नानावर्णराजीशिरासन्ततं भवत्येतत् सन्निपातोदरं विद्यात्" ॥

यकृत्प्लीहसमुद्भवस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—

"असितस्रातिसङ्क्षोभाद्यानयानातिचेष्टितैः ।
अतिव्यवायभाराध्ववमनव्याधिकर्षणैः ॥
वामपार्श्वाश्रितः प्लीहाच्युतः स्थानात् प्रवर्द्धते ।
शोणितं वा रसादिभ्यो विवृद्धं तं विवर्द्धयेत्" ॥

इति तस्य प्लीहाकठिनोऽष्ठिलेवादौ वर्द्धमानकच्छपसंस्थान उपलभ्यते सचोपेक्षितः क्रमेण कुक्षिं जठरमग्न्यधिष्ठानञ्च परिक्षिपन्नुदरमभिनिवर्त्तयति" ॥

अस्य रूपाणि यथा,—

"दौर्ब्बल्यारोचकाविपाकवर्च्चोमूत्रग्रहतमःपिपासाङ्गमर्द्द-च्छर्द्दि-मूर्च्छाङ्गसाद-कास-श्वास-मृदुज्वरानाहाग्निनाशकार्श्यास्यवैरस्य-पर्व्वभेद-कोष्ठ-वातशूलान्यपि चोदरमरुणवर्णं विवर्णं वा नीलहरित-हारिद्र-राजिमच्च भवत्येवमेव यकृदपि दक्षिणपार्श्वस्थं कुर्यात्तुल्यहेतुलिङ्गौषधत्वात्तस्य प्लीहजठरस्यैवावबोध इत्येतत् यकृत्प्लीहोदरं विद्यात्" ॥